# Ailagita from Shrimadbhagavatam

# શ્રીમદ્ભાગવતાન્તર્ગતા ઐલગીતા

## Document Information

Text title : shrimadbhAgavatAntargatA ailagItA

File name : ailagIta.itx

Category : giitaa, vyAsa

Location : doc_giitaa

Author : maharShi vyAsa

Proofread by : PSA Easwaran

Description-comments : Bhagavatam skanda 11 adhyAya 26

Latest update : July 10, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2022

*sanskritdocuments.org*

# શ્રીમદ્ભાગવતાન્તર્ગતા ઐલગીતા

શ્રીભગવાનુવાચ ।
મલ્લક્ષણમિમં કાયં લબ્ધ્વા મદ્ધર્મ આસ્થિતઃ ।
આનન્દં પરમાત્માનમાત્મસ્થં સમુપૈતિ મામ્ ॥ ૧॥

ગુણમય્યા જીવયોન્યા વિમુક્તો જ્ઞાનનિષ્ઠયા ।
ગુણેષુ માયામાત્રેષુ દૃશ્યમાનેષ્વવસ્તુતઃ ।
વર્તમાનોઽપિ ન પુમાન્ યુજ્યતેઽવસ્તુભિર્ગુણૈઃ ॥ ૨॥

સઙ્ગં ન કુર્યાદસતાં શિશ્નોદરતૃપાં ક્વચિત્ ।
તસ્યાનુગસ્તમસ્યન્ધે પતત્યન્ધાનુગાન્ધવત્ ॥ ૩॥

ઐલઃ સમ્રાડિમાં ગાથામગાયત બૃહચ્છ્રવાઃ ।
ઉર્વશીવિરહાન્મુહ્યન્ નિર્વિણ્ણઃ શોકસંયમે ॥ ૪॥

ત્યક્ત્વાઽઽત્માનં વ્રજન્તીં તાં નગ્ન ઉન્મત્તવન્નૃપઃ ।
વિલપન્નન્વગાજ્જાયે ઘોરે તિષ્ઠેતિ વિક્લવઃ ॥ ૫॥

કામાનતૃપ્તોઽનુજુષન્ ક્ષુલ્લકાન્ વર્ષયામિનીઃ ।
ન વેદ યાન્તીર્નાયાન્તીરુર્વશ્યાકૃષ્ટચેતનઃ ॥ ૬॥

ઐલ ઉવાચ ।
અહો મે મોહવિસ્તારઃ કામકશ્મલચેતસઃ ।
દેવ્યા ગૃહીતકણ્ઠસ્ય નાયુઃ ખણ્ડા ઇમે સ્મૃતાઃ ॥ ૭॥

નાહં વેદાભિનિર્મુક્તઃ સૂર્યો વાભ્યુદિતોઽમુયા ।
મુષિતો વર્ષપૂગાનાં બતાહાનિ ગતાન્યુત ॥ ૮॥

અહો મે આત્મસમ્મોહો યેનાત્મા યોષિતાં કૃતઃ ।
ક્રીડામૃગશ્ચક્રવર્તી નરદેવશિખામણિઃ ॥ ૯॥

સપરિચ્છદમાત્માનં હિત્વા તૃણમિવેશ્વરમ્ ।

યાન્તીં સ્ત્રિયં ચાન્વગમં નગ્ન ઉન્મત્તવદ્રુદન્ ॥ ૧૦॥

કુતસ્તસ્યાનુભાવઃ સ્યાત્તેજ ઈશત્વમેવ વા ।
યોઽન્વગચ્છં સ્ત્રિયં યાન્તીં ખરવત્પાદતાડિતઃ ॥ ૧૧॥

કિં વિદ્યયા કિં તપસા કિં ત્યાગેન શ્રુતેન વા ।
કિં વિવિક્તેન મૌનેન સ્ત્રીભિર્યસ્ય મનો હૃતમ્ ॥ ૧૨॥

સ્વાર્થસ્યાકોવિદં ધિઙ્માં મૂર્ખં પણ્ડિતમાનિનમ્ ।
યોઽહમીશ્વરતાં પ્રાપ્ય સ્ત્રીભિર્ગોખરવજ્જિતઃ ॥ ૧૩॥

સેવતો વર્ષપૂગાન્ મે ઉર્વશ્યા અધરાસવમ્ ।
ન તૃપ્યત્યાત્મભૂઃ કામો વહ્નિરાહુતિભિર્યથા ॥ ૧૪॥

પુંશ્ચલ્યાપહૃતં ચિત્તં કો ન્વન્યો મોચિતું પ્રભુઃ ।
આત્મારામેશ્વરમૃતે ભગવન્તમધોક્ષજમ્ ॥ ૧૫॥

બોધિતસ્યાપિ દેવ્યા મે સૂક્તવાક્યેન દુર્મતેઃ ।
મનો ગતો મહામોહો નાપયાત્યજિતાત્મનઃ ॥ ૧૬॥

કિમેતયા નોપકૃતં રજ્જ્વા વા સર્પચેતસઃ ।
રજ્જુસ્વરૂપાવિદુષો યોઽહં યદજિતેન્દ્રિયઃ ॥ ૧૭॥

ક્વાયં મલીમસઃ કાયો દૌર્ગન્ધ્યાદ્યાત્મકોઽશુચિઃ ।
ક્વ ગુણાઃ સૌમનસ્યાદ્યા હ્યધ્યાસોઽવિદ્યયા કૃતઃ ॥ ૧૮॥

પિત્રોઃ કિં સ્વં નુ ભાર્યાયાઃ સ્વામિનોઽગ્નેઃ શ્વગૃધ્રયોઃ ।
કિમાત્મનઃ કિં સુહૃદામિતિ યો નાવસીયતે ॥ ૧૯॥

તસ્મિન્ કલેવરેઽમેધ્યે તુચ્છનિષ્ઠે વિષજ્જતે ।
અહો સુભદ્રં સુનસં સુસ્મિતં ચ મુખં સ્ત્રિયાઃ ॥ ૨૦॥

ત્વઙ્માંસરુધિરસ્નાયુમેદોમજ્જાસ્થિસંહતૌ ।
વિણ્મૂત્રપૂયે રમતાં કૃમીણાં કિયદન્તરમ્ ॥ ૨૧॥

અથાપિ નોપસજ્જેત સ્ત્રીષુ સ્ત્રૈણેષુ ચાર્થવિત્ ।
વિષયેન્દ્રિયસંયોગાન્મનઃ ક્ષુભ્યતિ નાન્યથા ॥ ૨૨॥

અદૃષ્ટાદશ્રુતાદ્ભાવાન્ન ભાવ ઉપજાયતે ।
અસમ્પ્રયુઞ્જતઃ પ્રાણાન્ શામ્યતિ સ્તિમિતં મનઃ ॥ ૨૩॥

તસ્માત્સઙ્ગો ન કર્તવ્યઃ સ્ત્રીષુ સ્ત્રૈણેષુ ચેન્દ્રિયૈઃ ।
વિદુષાં ચાપ્યવિસ્રબ્ધઃ ષડ્વર્ગઃ કિમુ માદૃશામ્ ॥ ૨૪॥

શ્રીભગવાનુવાચ
એવં પ્રગાયન્ નૃપદેવદેવઃ
    સ ઉર્વશીલોકમથો વિહાય ।
આત્માનમાત્મન્યવગમ્ય માં વૈ
    ઉપારમજ્જ્ઞાનવિધૂતમોહઃ ॥ ૨૫॥

તતો દુઃસઙ્ગમુત્સૃજ્ય સત્સુ સજ્જેત બુદ્ધિમાન્ ।
સન્ત એતસ્ય છિન્દન્તિ મનોવ્યાસઙ્ગમુક્તિભિઃ ॥ ૨૬॥

સન્તોઽનપેક્ષા મચ્ચિત્તાઃ પ્રશાન્તાઃ સમદર્શિનઃ ।
નિર્મમા નિરહઙ્કારા નિર્દ્વન્દ્વા નિષ્પરિગ્રહાઃ ॥ ૨૭॥

તેષુ નિત્યં મહાભાગ મહાભાગેષુ મત્કથાઃ ।
સમ્ભવન્તિ હિ તા નૃણાં જુષતાં પ્રપુનન્ત્યઘમ્ ॥ ૨૮॥

તા યે શ‍ૃણ્વન્તિ ગાયન્તિ હ્યનુમોદન્તિ ચાદૃતાઃ ।
મત્પરાઃ શ્રદ્દધાનાશ્ચ ભક્તિં વિન્દન્તિ તે મયિ ॥ ૨૯॥

ભક્તિં લબ્ધવતઃ સાધોઃ કિમન્યદવશિષ્યતે ।
મય્યનન્તગુણે બ્રહ્મણ્યાનન્દાનુભવાત્મનિ ॥ ૩૦॥

યથોપશ્રયમાણસ્ય ભગવન્તં વિભાવસુમ્ ।
શીતં ભયં તમોઽપ્યેતિ સાધૂન્ સંસેવતસ્તથા ॥ ૩૧॥

નિમજ્જ્યોન્મજ્જતાં ઘોરે ભવાબ્ધૌ પરમાયણમ્ ।
સન્તો બ્રહ્મવિદઃ શાન્તા નૌર્દૃઢેવાપ્સુ મજ્જતામ્ ॥ ૩૨॥

અન્નં હિ પ્રાણિનાં પ્રાણ આર્તાનાં શરણં ત્વહમ્ ।
ધર્મો વિત્તં નૃણાં પ્રેત્ય સન્તોઽર્વાગ્બિભ્યતોઽરણમ્ ॥ ૩૩॥

સન્તો દિશન્તિ ચક્ષૂંષિ બહિરર્કઃ સમુત્થિતઃ ।
દેવતા બાન્ધવાઃ સન્તઃ સન્ત આત્માહમેવ ચ ॥ ૩૪॥

વૈતસેનસ્તતોઽપ્યેવમુર્વશ્યા લોકનિસ્પૃહઃ ।
મુક્તસઙ્ગો મહીમેતામાત્મારામશ્ચચાર હ ॥ ૩૫॥

॥ ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં સંહિતાયામેકાદશસ્કન્ધે

ષડ્વિંશોઽધ્યાયાન્તર્ગતં ઐલગીતા સમાપ્તા ॥ ૧૧.૨૬॥

Bhagavatam skandha 11 adhyAya 26.

*Ailagita from Shrimadbhagavatam*

pdf was typeset on July 10, 2022

Please send corrections to *sanskrit@cheerful.com*